# श्रीदेवीभागवते महापुराणे सरस्वत्यी कवचं
# śrīdevībhāgavate mahāpurāṇe sarasvatyī kavacaṁ

लक्ष्मीमायादिकं चैव मन्त्रोऽयं कल्पपादपः ।
पुरा नारायणश्चेमं वाल्मीकाय कृपानिधिः ॥ ५२ ॥
lakṣmīmāyādikaṁ caiva mantro-yaṁ kalpapādapaḥ |
purā nārāyaṇaścemaṁ vālmīkāya kṛpānidhiḥ || 52 ||

प्रददौ जाह्नवीतीरे पुण्यक्षेत्रे च भारते ।
भृगुर्ददौ च शुक्राय पुष्करे सूर्यपर्वणि ॥ ५३ ॥
pradadau jāhnavītīre puṇyakṣetre ca bhārate |
bhṛgurdadau ca śutrāya puṣkare sūryaparvaṇi || 53 ||

चन्द्रपर्वति मारीचो ददौ वाक्यतये मुदा ।
भृचोश्चैव ददौ तुष्टो ब्रह्मा बदरिकाश्रमे ॥ ५४ ॥
candraparvati mārīco dadau vākyataye mudā |
bhṛcoścaiva dadau tuṣṭho brahmā badarikāśrame || 54 ||

आस्तिकस्य जरत्कारुर्ददौ क्षीरोदसन्निधौ ।
विभाण्डको ददौ मेरौ ऋष्यशृङ्गाय धीमते ॥ ५५ ॥
āstikasya jaratkārurdadau kṣīrodasannidhau |
vibhāṇḍako dadau merau ṛṣyaśṛṅgāya dhīmate || 55 ||

शिवः कणादमुनये गौतमाय ददौ मुदा ।
सूर्यश्च याज्ञवल्क्याय तथा कात्यायनाय च ॥ ५६ ॥
śivaḥ kaṇādamunaye gautamāya dadau mudā |
sūryaśca yājñavalkyāya tathā kātyāyanāya ca || 56 ||

शेषः पाणिनये चैव भारद्वाजाय धीमते ।
ददौ शाकटायनाय सुतले वलिसंसदि ॥ ५७ ॥
śeṣaḥ pāṇinaye caiva bhāradvājāya dhīmate |
dadau śākaṭāyanāya sutale valisaṁsadi || 57 ||

चतुर्लक्षजपेनैव मन्त्रः सिद्धो भवेन्नृणाम् ।
यदि स्यान्मन्त्रसिद्धो हि बृहस्पतिसमो भवेत् ॥ ५८ ॥
caturlakṣajapenaiva mantraḥ siddho bhavennṛṇām |
yadi syānmantrasiddho hi bṛhaspatisamo bhavet || 58 ||

कवचं शृणु विप्रेन्द्र यद्दत्तं ब्रह्मणा पुरा ।
विश्वस्रष्टा विश्वजयं भृगवे गन्धमादने ॥ ५९ ॥
kavacaṁ śṛṇu viprendra yaddattaṁ brahmaṇā purā |
viśvasraṣṭā viśvajayaṁ bhṛgave gandhmādane || 59 ||

भृगुरुवाच
bhṛguruvāca

ब्रह्मन् ब्रह्मविदां श्रेष्ठ ब्रह्मज्ञानविशारद ।
सर्वज्ञ सर्वजनक सर्वेश सर्वपूजित ॥ ६० ॥
brahman brahmavidāṁ śreṣṭha brahmajñānaviśārada |
sarvajña sarvajanaka sarveśa sarvapūjita || 60 ||

सरस्वत्याश्च कवचं ब्रूहि विश्वजयं प्रभो ।
अयातयामं मन्त्राणां समूहसंयुतं परम् ॥ ६१॥
sarasvatyāśca kavacaṁ brūhi viśvajayaṁ prabho |
ayātayāmaṁ mantrāṇāṁ samūhasaṁyutaṁ param || 61||

## ब्रह्मोवाच
## brahmovāca

शृणु वत्स प्रवक्ष्यामि कवचं सर्वकामदम् ।
श्रुतिसारं श्रुतिसुखं श्रुत्युक्तं श्रुतिपूजितम् ॥ ६२ ॥
śṛṇu vatsa pravakṣyāmi kavacaṁ sarvakāmadam ǀ
śrutisāraṁ śrutisukhaṁ śrutyuktaṁ śrutipūjitam ǁ 62 ǁ

उक्तं कृष्णेन गोलोके मह्यं वृन्दावने वने ।
रासेश्वरेण विभुना रासे वै रासमण्डले ॥ ६३ ॥
uktaṁ kṛṣṇena goloke mahyaṁ vṛndāvane vane ǀ
rāseśvareṇa vibhunā rāse vai rāsamaṇḍale ǁ 63 ǁ

अतीव गोपनीयं च कल्पवृक्षसमं परम् ।
अश्रुताद्भुतमन्त्राणां समूहैश्च समन्वितम् ॥ ६४ ॥
atīva gopanīyaṁ ca kalpavṛkṣasamaṁ param ǀ
aśrutādbhutamantrāṇāṁ samūhaiśca samanvitam ǁ 64 ǁ

यद् धृत्वा भगवाञ्छुक्रः सर्वदैत्येषु पूजितः ।
यद् धृत्वा पठनात् ब्रह्मन् बुद्धि मांश्च बृहस्पतिः ॥ ६५ ॥
yad dhṛtvā bhagavāñchukraḥ sarvadaityeṣu pūjitaḥ ǀ
yad dhṛtvā paṭhanāt brahman buddhi māṁśca bṛhaspatiḥ ǁ 65 ǁ

पठनाद्धारणाद्वाग्मी कवीन्द्रो वाल्मिको मुनिः ।
स्वायम्भुवो मनुश्चैव यद् धृत्वा सर्वपूजितः ॥ ६६ ॥
paṭhanāddhāraṇādvāgmī kavīndro vālmiko muniḥ ǀ
svāyambhuvo manuścaiva yad dhṛtvā sarvapūjitaḥ ǁ 66 ǁ

कणादो गौतमः कण्वः पाणिनिः शाकटायनः ।
ग्रन्थं चकार यद् धृत्वा दक्षः कात्यायनः स्वयम् ॥ ६७ ॥
kaṇādo gautamaḥ kaṇvaḥ pāṇiniḥ śākaṭāyanaḥ ǀ
granthaṁ cakāra yad dhṛtvā dakṣaḥ kātyāyanaḥ svayam ǁ 67 ǁ

धृत्वा वेदविभागं च पुराणान्यखिलानि च ।
चकार लीलामात्रेण कृष्णद्वैपायनः स्वयम् ॥ ६८ ॥
dhṛtvā vedavibhāgaṁ ca purāṇānyakhilāni ca ǀ
cakāra līlāmātreṇa kṛṣṇadvaipāyanaḥ svayam ǁ 68 ǁ

शातातपश्च संवर्तो वसिष्ठश्च पराशरः ।
यद् धृत्वापठनाद् ग्रन्थं याज्ञवल्क्यश्चकार सः ॥ ६९ ॥
śātātapaśca saṁvarto vasiṣṭhaśca parāśaraḥ ǀ
yad dhṛtvāpaṭhanād granthaṁ yājñavalkyaścakāra saḥ ǁ 69 ǁ

ऋष्यशृङ्गो भरद्वाजश्चास्तिको देवलस्तथा ।
जैगीषव्यो ययातिश्च धृत्वा सर्वत्र पूजितः ॥ ७० ॥
ṛṣyaśṛṅgo bharadvājaśvāstiko devalastathā ǀ
jaigīṣavyo yayātiśca dhṛtvā sarvatra pūjitaḥ ǁ 70 ǁ

कवचस्याऽस्य विप्रेन्द्र ऋषिरेव प्रज्ञापतिः ।
स्वयं छन्दश्च बृहती देवता शारदाऽम्बिका ॥ ७१ ॥
kavacasyāsya viprendra ṛṣireva prajjāpatiḥ ǀ
svayaṁ chandaśca bṛhatī devatā śāradāmbikā ǁ 71 ǁ

सर्गतत्त्वपरिज्ञान-सर्वार्थसाधनेषु च ।
कवितासु च सर्वासु विनियोगः प्रकीर्तितः ॥ ७२ ॥
sargtattvaparijñāna-sarvārthasādhaneṣu ca ǀ
kavitāsu ca sarvāsu viniyogaḥ prakīrtitaḥ ǁ 72 ǁ

श्रीं ह्रीं सरस्वत्यै स्वाहा शिरो मे पातु सर्वतः ।
श्रीं वाग्देवतायै स्वाहा भालं मे सर्वदाऽवतु ॥ ७३ ॥
śrīṁ hrīṁ sarasvatyai svāhā śiro me pātu sarvataḥ |
śrīṁ vāgdevatāyai svāhā bhālaṁ me sarvadā-vatu || 73 ||

ॐ ह्रीं सरस्वत्यै स्वाहेति श्रोत्रे पातु निरन्तरम् ।
ॐ श्रीं ह्रीं भगवत्यै सरस्वत्यै स्वाहा नेत्रयुग्मं सदाऽवतु ॥ ७४ ॥
oṁ hrīṁ sarasvatyai svāheti śrotre pātu nirantaram |
oṁ śrīṁ hrīṁ bhagavatyai sarasvatyai svāhā netrayugmaṁ sadā-vatu || 74 ||

ऐं ह्रीं वाग्वादिन्यै स्वाहा नासां मे सर्वदाऽवतु ।
ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा चोंष्ठ सदाऽवतु ॥ ७५ ॥
aiṁ hrīṁ vāgvādinyai svāhā nāsāṁ me sarvadā-vatu |
hrīṁ vidyādhiṣṭhātṛdevyai svāhā coṁṣṭha sadā-vatu || 75 ||

ॐ श्रीं ह्रीं ब्राह्म्यै स्वाहेति दन्तपङ्क्तिं सदाऽवतु ।
ऐं मित्येकाक्षरो मन्त्रो मम कण्ठं सदाऽवतु ॥ ७६ ॥
oṁ śrīṁ hrīṁ brāhmyai svāheti dantapaṅktiṁ sadā-vatu |
aiṁ mityekākṣaro mantro mama kaṇṭhaṁ sadā-vatu || 76 ||

ॐ श्रीं ह्रीं पातु मे ग्रीवां स्कन्धौ मे श्रीं सदाऽवतु ।
ॐ ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा वक्षः सदाऽवतु ॥ ७७ ॥
oṁ śrīṁ hrīṁ pātu me grīvāṁ skandhau me śrīṁ sadā-vatu |
oṁ hrīṁ vidyādhiṣṭhātṛdevyai svāhā vakṣaḥ sadā-vatu || 77 ||

ॐ ह्रीं विद्याधिस्वरूपायै स्वाहा मे पातु नाभिकाम् ।
ॐ ह्रीं क्लीं वाण्यै स्वहेति मम हस्तौ सदाऽवतु ॥ ७८ ॥
oṁ hrīṁ vidyādhisvarūpāyai svāhā me pātu nābhikām |
oṁ hrīṁ klīṁ vāṇyai svaheti mama hastau sadā-vatu || 78 ||

ॐ सर्ववर्णात्मिकायै पादयुग्मां सदाऽवतु ।
ॐ वागधिष्ठातृदेव्यै स्वाहा मां सदाऽवतु ॥ ७९ ॥
oṁ sarvavarṇātmikāyai pādayugmāṁ sadā-vatu |
oṁ vāgadhiṣṭhātṛdevyai svāhā māṁ sadā-vatu || 79 ||

ॐ सर्वकण्ठवासिन्यै स्वाहा प्राच्यां सदाऽवतु ।
ॐ सर्वजिह्वाग्रवासिन्यै स्वाहाऽग्निदिशि रक्षतु ॥ ८० ॥
oṁ sarvakaṇṭhavāsinyai svāhā prācyāṁ sadā-vatu |
oṁ sarvajivāgravāsinyai svāhā-gnidiśi rakṣatu || 80 ||

ॐ ऐं ह्रीं क्लीं सरस्वत्यै बुधजनन्यै स्वाहा ।
सततं मन्त्रराजोऽयं दक्षिणे मां सदाऽवतु ॥ ८१ ॥
oṁ aiṁ hrīṁ klīṁ sarasvatyai budhajananyai svāhā |
satataṁ mantrarājo-yaṁ dakṣiṇe māṁ sadā-vatu || 81 ||

ऐं ह्रीं श्रीं त्र्यक्षरो मन्त्रो नैऋत्यां सर्वदाऽवतु ।
ॐ ऐं जिह्वाग्रवासिन्यै स्वाहा मां वारुणेऽवतु ॥ ८२ ॥
aiṁ hrīṁ śrīṁ tryakṣaro mantro nairṛtyāṁ sarvadā-vatu |
oṁ aiṁ jihvāgravāsinyai svāhā māṁ vāruṇevatu || 82 ||

ॐ सर्वाम्बिकायै स्वाहा वायव्ये मां सदाऽवतु ।
ॐ ऐं श्रीं क्लीं गद्यवासिन्यै स्वाहा मामुत्तरेऽवतु ॥ ८३ ॥
oṁ sarvāmbikāyai svāhā vāyavye māṁ sadā-vatu |
oṁ aiṁ śrīṁ klīṁ gadyavāsinyai svāhā māmuttare-vatu || 83 ||

ऐं सर्वशास्त्रवासिन्यै स्वाहैशान्यां सदाऽवतु ।
ॐ ह्रीं सर्वपूजितायै स्वाहा चोर्ध्वं सदाऽवतु ॥ ८४ ॥
aiṁ sarvaśāstravāsinyai svāhaiśānyāṁ sadā-vatu |
oṁ hrīṁ sarvapūjitāyai svāhā cordhvaṁ sadā-vatu || 84 ||

ह्रीं पुस्तकवासिन्यै स्वाहाऽधो मां सदाऽवतु ।
ॐ ग्रन्थबीजस्वरूपायै स्वाहा मां सर्वतोऽवतु ॥ ८५ ॥
hrīṁ pustkavāsinyai svāhā-dho māṁ sadā-vatu |
oṁ granthabījasvarūpāyai svāhā māṁ sarvato-vatu || 85 ||

इति ते कथितं विप्र ब्रह्ममन्त्रौघविग्रहम् ।
इदं विश्वजयं नाम कवचं ब्रह्मरूपकम् ॥ ८६ ॥
iti te kathitaṁ vipra brahmamantraughavigraham |
idaṁ viśvajayaṁ nāma kavacaṁ brahmarūpakam || 86 ||

पुरा श्रुतं धर्मवक्त्रात् पर्वते गन्धमादने ।
तव स्नेहान्मयाऽऽख्यातं प्रवक्तव्यं न कस्यचित् ॥ ८७ ॥
purā śrutaṁ dharmavaktrāt parvate gandhamādane |
tava snehānmayākhyātaṁ pravaktavyaṁ na kasyacit || 87 ||

गुरुमभ्यर्च्य विधिवद्वस्त्रालङ्कारचन्दनैः ।
प्रणम्य दण्डवद्भूमौ कवचं धारयेत् सुधीः ॥ ८८ ॥
gurumabhyarcya vidhivadvastrālaṅkārcandanaiḥ |
praṇamya daṅḍavadbhūmau kavacaṁ dhārayet sudhīḥ || 88 ||

पञ्चलक्षजपेनैव सिद्धं तु कवचं भवेत् ।
यदि स्यात् सिद्धकवचो बृहस्पतिसमो भवेत् ॥ ८९ ॥
pañcalakṣajapenaiva siddhaṁ tu kavacaṁ bhavet |
yadi syāt siddhakavaco bṛhaspatisamo bhavet || 89 ||

महावाग्मी कवीन्द्रश्च त्रैलोक्यविजयीभवेत् ।
शक्नोति सर्वं जेतुं च कवचस्य प्रसादतः ॥ ९० ॥
mahāvāgmī kavīndraśca trailokyavijayībhavet |
śaknoti sarvaṁ jetuṁ ca kavacasya prasādataḥ || 90 ||

इदं च कण्वशाखोक्तं कवचं कथितं मुने ।
स्तोत्रपूजाविधानं च ध्यानं च वन्दनं शृणु ॥ ९१ ॥
idaṁ ca kaṇvaśākhoktaṁ kavacaṁ kathitaṁ mune |
stotrapūjāvidhānaṁ ca dhyānaṁ ca vandanaṁ śṛṇu || 91 ||

इति श्रीदेवीभागवते महापुराणे नवमस्कन्धे चतुरर्थोऽधयाः ४
iti śrīdevībhāgavate mahāpurāṇe navamaskandhe caturarthodhāyāḥ 4